# पञ्चमोऽध्यायः

# वैदिकलोकतन्त्रस्याधुनिकप्रासङ्गिकत्वम्

वेदशास्त्रमपौरूषेयं सर्वप्राचीनं सर्वकालिकञ्च। अनादिकालात्प्रवर्तितस्य शास्त्रस्यान्तर्निहितं ज्ञानं वैदिकसमाजे यथा प्रयुज्यमासीत् तथैव सम्प्रतिरपि तस्य प्रासङ्गिकता परिलक्ष्य वैदिकशास्त्रोपलब्धस्य राजनैतिकज्ञानस्यापि प्रासङ्गिकत्वं विविधालोचनाभि: चर्चित। वैदिकराजनीत्यां लोकतान्त्रिकधारणाया: अधुना प्रासङ्गिकत्वस्य वर्णनमेव अस्य अध्यायस्य मूल: विषय:।

यद्यपि वैदिकलोकतान्त्रिकविधि-आदर्शादिनां आधुनिकविकशित-संशोधितलोकतान्त्रिकादर्शै: सह साक्षात् प्रासङ्गिकत्वं नैवोपलभ्यते तथापि युद्ध-विकाश-वैदेशिक-निर्वाचन-पर्यावेक्षणादिनीतिसु गोचरीभूता: केचन आदर्शा: विशेषतया द्रष्टव्या:। इमान् विषयान्नाधारीकृत्य वैदिकलोकतन्त्रस्य अधुनाप्राङ्गिकत्वं निरुपयितुमयं प्रयास:।

**१. वैदिकलोकतन्त्रस्य निर्वाचननीति वर्तमानकाले तस्या: प्रासङ्गिकता –**

तत्रादौ वैदिकलोकतन्त्रस्य निर्वाचननीत्या: वर्तमानप्रासङ्गिकत्वमुपस्थाप्यते। निर्वाचनव्यवस्थामधिकृत्य वैदिकाधुनिकयो: लोकतान्त्रिकादर्शयो: मध्ये वैविध्यता परिलक्षते। वैदिकलोकतन्त्रं व्यक्तित्वप्रधानं किन्तु वर्तमानलोकतन्त्रं व्यक्तिप्रधानम्। वर्तमानकालिनलोकतन्त्रे निर्वाचनव्यवस्थायां व्यक्तिनां संख्यागणना भवति न तस्य व्यक्तित्वस्य। यथा संख्यागणनायां शिक्षितजनस्य यत् मतमूल्यं (Vote value) अशिक्षितजनस्यापि तदेव मूल्यं, येन वास्तविकयोग्योजन: तिरस्कृतो भवति न च तत्र प्रकृतलोकतन्त्रात्मकादर्श फलीभूयते।

इतोऽपि वर्तमान-लोकतान्त्रिकप्रशासनव्यवस्थायां जनप्रतिनिधे: योग्यायोग्यत्वस्य परीक्षणं निर्वाचनायोगेन विविधनीतिप्रणयनद्वारा विधीयते तथैव वैदिकलोकतान्त्रिकप्रशासने अपि (स्वराज्यव्यवस्थायां) जनप्रतिनिधे: परीक्षणस्य व्यवस्था आसीत्। न केवलं तस्य जनप्रतिनिधिजनस्य जीवनवृत्तमपितु शैक्षिक-बौद्धिक-नैतिक-तार्किकविषयज्ञानानामपि

परीक्षणस्य व्यवस्था विकशितासीत्।[१] तादृश्याः वैदिकव्यवस्थायाः अनुकरणेन इह वर्तमानकालिननिर्वाचनव्यवस्थायां केचन विचाराः उपस्थाप्यन्ते-

क. कमपि जनं जनसमूहस्य प्रतिनिधित्वेन वरणात्पूर्वं प्रतिनिधिजनस्य जीवनवृत्तादीनां सम्यक् विश्लेषणं करणीयम्।

ख. जनप्रतिनिधेः बौद्धिकस्तरस्य परीक्षणार्थं निर्वाचन-आयोगद्वारा परीक्षायाः व्यवस्था विधातव्या।

ग. विभिन्नजनसमुदायानां जनसंख्यानुसारेण तेषां प्रतिनिधिसंख्या निर्णितव्या।

जनप्रतिनिधेः परीक्षणवत् राष्ट्रस्थजनसाधारणानां, ये च निर्वाचकाः तेषामपि व्यक्तित्वस्य परीक्षणमत्यन्तमावश्यकम्। वय-जन्म-विवाह-वाणिज्यादिसूत्रेण प्राप्तं नागरिकत्वमेव शासकचयनार्थं यथोपयुक्तं न स्यात्। तत्कृते तु ज्ञान-वुद्धि-विवेक-सक्रियतादिनां गुणानां प्रयोजनं भवेत्। अतः वैदिकर्षिभिः 'इयचक्षसजनं' (दूरदृष्टिसम्पन्नजनं) स्वराज्यं प्रति अग्रेसर्तुमाह्वयते।[२]

स्वराज्यस्य जनप्रतिनिधिचयनार्थं राजकर्तारान्, अर्थात् ये राजनिर्वाचनं कुर्वन्ति तान्प्रति कतिपय आवश्यकीययोग्यतानां प्रयोजनं स्वराज्यस्य संविधाने उल्लिखितं प्राप्यते। यथा –

क. "स्वस्ति पन्थामनुचरेम"[३] – अर्थात् सदैवकल्याणप्रदमार्गमनुचरणीयम्। कल्याणकारीभावनया सदैव जागृताः जनसाधारणाः भवेयुरिति तात्पर्यम्।

ख. "शुद्धाः पूता यज्ञियासः"[४] – शुद्ध-पवित्र-परोपकारभावसमृद्धा जीवनचर्या भवितव्या।

ग. "वैश्वानरज्योतिर्भूयासम्"[५] – अर्थात् आध्यात्मिकसाधनया तेजोद्दीप्त-जीवनचरितसम्पन्नं भवितव्यम्।

घ. “मा नो दिक्षत कश्चन”[६] अर्थात् शत्रूभावरहितं च भवितव्यम्। शत्रूभावरहितं भूत्वा एव स: मानवसमाजस्य परममित्रं भवितुं शक्नोति इति भाव:।

ङ. “शं मे अस्तु अभयं मे अस्तु”[७] अर्थात् सदैव कल्याणमयी-भावनासम्पन्ना: भयभावरहिताश्च भवितव्या:।

च. “सशितं म इदं ब्रह्म”[८] अर्थात् समग्र ब्रह्माण्डस्य सृष्टि-पालन-संहारस्य एकमेव सर्वशक्तिसम्पन्नं शासकत्वं (ब्रह्मत्वं) स्वस्योपरि अन्तर्निहितमस्ति इति विचिन्त्य शासकानां शासनादिकार्ये प्रजाभि: जागरूकै: भवितव्यम्।

एवं क्रमेण वैदिकलोकतान्त्रिकराष्ट्रे जनप्रतिनिधिवत् निर्वाचकानामपि केषाञ्चनविशेषगुणानामावश्यकमासीत्, यच्चाधुना नैव प्राप्यते। अत: वैदिकलोकतान्त्रिकादर्शस्याधुना प्रासङ्गिकता नितान्तमनुभूयते।

## २. वैदिकलोकतन्त्रस्य संविधानप्रणयन-संशोधननीति: वर्तमानकाले तस्या: प्रासङ्गिकता –

वैदिकलोकतान्त्रिकप्रशासनस्य प्रासङ्गिकता वर्णनावसरे संविधानव्यवस्थाया: उल्लेखं कर्तुं शक्यते। संविधानमित्यनेन तान् मौलिकसिद्धान्तान् बोद्धव्या: येषामनुकरणेन कस्यापि एकस्य देशस्य शासनव्यवस्था सृङ्खलितया परिचाल्यते। संविधान-निर्माणविषये “भद्रमिच्छन्त ऋषय: स्वर्विदो तप:”[९] प्रभृति मन्त्राणामुल्लेखो प्राप्यते। तप-दीक्षादिवलेन ऋषिभि: विधिनियमानां सृजनमकुर्वन्। राष्ट्रतत्वस्य वीजरूपाणां तेषां नीतिनां संकलनमेवासीत् “संविधानम्”।

वैदिकराजनीतौ विकशितानां विविधानां शासनप्रकारकाणां प्रत्येकस्य भिन्नं भिन्नं संविधानं, राष्ट्रसंञ्चालनस्य नीतय: वा आसन्। साम्राज्य-भौज्याद-शासने शासकजनं निर्णेतुं

योग्यायोग्यत्वस्य परीक्षणादनन्तरं जनसाधारणानामपि समर्थनमावश्यकमासीदिति प्रमाणम् उपलभ्यते। तेषु प्रत्येकविधेषु लोकतान्त्रिकप्रशासनेष्वपि वैधानिकवैविध्यता विशेषप्रकारेण लक्षणीया। यत्र वैराज्ये शासकविहीनं लोकतान्त्रिकप्रशासनस्य व्याख्या प्रदत्तास्ति परन्तु स्वराज्ये जानराज्ये च जनसमर्थनपूर्वकं निर्वाचितपुरूषेण परिचालितस्य तन्त्रस्य वर्णनमुपलभ्यते।

एवं क्रमेण प्रत्येकशासनविधौ पृथकतया शासनविधि: परिचाल्यते। प्रत्येकेभ्य: जनप्रतिनिधिभ्य: पृथक् पृथक् उपाधि-प्रदानस्य व्यवस्थापि संहिता-ब्राह्मणादिग्रन्थे समुपलब्धा:।[१०] किन्तु प्रत्येकेषां संविधानानां मौलिकभेदविषये विशद् विवेचनं कस्यापि ग्रन्थे स्पष्टतया नोल्लेखितम्।[११] तथापि वैदिकलोकतान्त्रिकप्रशासनस्य संविधानव्यवस्थाया: प्रासंगिकत्वं तु विराजते हि। इतोऽपि संविधानस्य प्रणयन-संशोधनविषये वर्तमानकालिका राजनीतिज्ञै: वैदिकादर्शं विशेषप्रकारेणानुकरणीयम्। ते च आदर्शा: -

क. संविधानप्रणयनार्थं कतिपय ऋषीगणानां चयनं संहितासूपलब्धम्। कुत्रचित् प्रतिभासम्पन्नानां विदुषां व्यवहारविदां सर्वज्ञपुरूषविशेषाणां विधिनिर्माणार्थं नियोजनस्य वृत्तान्तं उपलब्धम्।[११]

ख. कुत्रचित्पुन: प्रत्यक्षज्ञानेन अनुसन्धानेन वा संग्रहितानुभवान् विधिरूपेण राष्ट्रसञ्चालनार्थं कुञ्जिकारूपेण (संविधानरूपेण) च स्वीकृतम्।[१२]

ग. वैदिकसंविधानप्रणयनात् पूर्वं विधिनिर्मातार: ऋषय: जनगणानामाचारव्यवहारं सामाजिकपरम्पराञ्च अधीत्य विधीनां निर्माणमकुर्वन्निति प्रोच्यते।[१३]

घ. वैदिक विधीनां संशोधनं स्थानीयसभाषु (ग्रामसभाषु) जनमतग्रहणपूर्वकमेव स्थीरिक्रियते।[१४]

अत: सम्प्रतिक राजनीते: अपि सर्वकारेण गृहीत: नीति: विधि: वा जनगणानां कृते फलदायकं अस्ति नास्ति वेति विचारणीयम्। आधुनिकलोकतान्त्रिकराष्ट्रेषु संविधानप्रणयनावसरे संविधानप्रणेताषु दूरदृष्टिणामभाव: आसीदिति प्रतिभाति। यत: संविधानस्वीकृतस्य स्वल्पसमयानन्तरमेव संविधानसंशोधनस्य प्रयोजनं समागतम्। परन्तु वैदिकऋषिगणै: स्वस्य तपस्याया: बलेन प्राप्तं ज्ञानं समालोच्य विनिर्मितविधय: सर्वेषु स्थानेषु कालेषु परिस्थितिषु च स्वस्य प्रासङ्गिकतामधुनापि प्रदर्श्यते। अत: तेषां वैदिकविधिनामनुकरणेन संविधानप्रणयनस्य विचारा: उपस्थाप्यतेऽत्र।

यतोहि समाजशास्त्रं परिवर्तनशीलम्। अत: समाजसञ्चालका: संविधान-विधय: अपि समये समये संशोधितव्या:। आधुनिकलोकतान्त्रिकराष्ट्रे संविधानसंशोधनार्थं संसदि विशेषविधिव्यवस्था प्रत्यक्षीक्रियते। किन्तु जनसमर्थनपूर्वकं विधे: परिवर्तनं परिवर्धनं वा नैव प्रचलितम्। येन प्रायश: संविधान-संशोधनेन सर्वसाधारणानां जनानां जीवने हानिरपि भवितुं शक्नोति।

एवं परिस्थितिसमागते सति वैदिकसंविधानसंशोधनव्यवस्थामनुसृत्य ग्रामसभासु जनमत-ग्रहणपूर्वकं तेषां सामाजिकपरम्परामनुसृत्यैव विशेषनीतिनां ग्रहणं विशेषफलदायकं भवितुमर्हति। अत: अस्य प्रासङ्गिकत्वं सर्वदा वरीवर्तते।

### ३. वैदिकलोकतन्त्रस्य विकाशनीति वर्तमानकाले तस्य प्रासंगिकता –

वैदिकलोकतन्त्रस्य विकाशनीतेरपि वर्तमानसमये प्रासङ्गिकत्वं भजते। स्वराज्य-जानराज्यादिप्रशासने जननायकेन स्थिरकल्याणकारीनीतिप्रणयनस्य कामना क्रियते।[१५] कुत्रचित् तेषां (प्रजानां) योगक्षेमस्य सम्यक् परिपालनार्थं कृता प्रार्थनापि श्रुयते।[१६] सायणाचार्य: "अप्राप्तस्य प्रापणं योग: प्राप्तस्य संरक्षणं क्षेम:"[१७] इत्यनेन वाक्येन विविधधनसम्पदादिनां (मानवसम्पदां च) आहरणस्य संरक्षणस्योल्लेखं च प्रस्तुतम्। तत्कालीनप्रशासने

मानवसम्पदमुन्नतेर्निमित्तं विशेषविधानं परिलक्षते।

यतोहि बुद्धि-वृत्ति-सृजनप्रतिभाया: अगाधज्ञानसागर: युवावर्गे एव निहितो विद्यते। ते युवान: एव भाविन: राष्ट्रस्य जनका: वर्तन्ते, अत: तेषामुन्नतिद्वारा एकस्य समाजस्य सामग्रिकोन्नति: भवितुमर्हति। भाष्यकारसायणेन अपि युवावर्गस्य प्रतिभा धनुर्निर्गतेन वाणेन सह उपमीयते।[१८] तथा च तेषामुन्नतेर्निमित्तं वैदिकपण्डितै: दूरदृष्टिसम्पन्नऋषिगणै: सम्पादितं प्रशंसनीयं कल्याणकारीकार्यं प्रति समर्थनं प्रदर्शयति। स्वराज्यशासने कृषि-व्यापार-वाणिज्य-शिक्षा-शिल्पकला-सैन्यवलादि- विविधसेवामुलककार्याणां सम्पादनेन मानवसम्पदुन्नतिं कामयते। अत: संहिताषु विविधस्तुतिमन्त्रेषु वा एतेषां कृषि-वाणिज्य-शिल्पकलादिनां प्रणयनसूचका: मन्त्रा: परिलक्षन्ते।

एतेषां विविधानां विकाशमूलकनीतिनां प्रणयनसमये वैदिकऋषिभि: न केवलं तत्कालीनलोकतान्त्रिकप्रशासने प्रयुज्यानां नीतिनामेव ग्रहणमपितु भविष्यत्प्रजन्मानां कृतेऽपि चोपकारी भवतीति विचिन्त्य सर्वकालिकमङ्गलमयीनीति: प्रणिता:।[१९]

साम्प्रतिकलोकतन्त्रे प्रत्येकस्य राजनैतिकगणस्य स्वार्थपूरणार्थं स्व-स्वानुकूलनीतिनां प्रणयनव्यवस्था प्रत्यक्षीक्रियते। एकस्य राजनौतिकमतस्य शासनादनन्तरमन्यमतमागच्छति चेत् पूर्वनिर्धारितानां कतिपयनीतिनां संशोधनं (स्वस्यानुकुलं) कतिपयानां पूर्णत: वर्जनं च क्रियते। या च जनसाधारणानां कल्याणमार्गे विघ्नकारी भवति। अत: तद्वैदिकलोकतान्त्रिकप्रशासनस्य विकाशनीति: युगानुकूलपरिवर्तनेन प्रयुज्यते चेत् वर्तमानकालस्य लोकतान्त्रिकप्रशासनमधिकं फलदायकं भवितुं शक्नोति इति प्रतिभाति।

**४. वैदिकलोकतन्त्रस्य वैदेशिकनीति वर्तमानसमये तस्या: प्रासंगिकता च –**

वैदिकलोकतान्त्रिकप्रशासनस्य प्रासंगिकतावर्णनावसरे वैदिकतन्त्रस्य वैदेशिकनीतिनामुल्लेखं कर्तुं शक्यते। वैदिक-वैदेशिकनीतय: शान्तिप्रिया: मंगलकारिण्यश्चासन्। अत: तासां नीतिनां

पालनेन सम्प्रति अपि वयं अस्माकं राष्ट्रस्य गौरवोज्वलप्रतिच्छवि निर्णेतुं शक्नुम:।

वैदिकलोकतान्त्रिकप्रशासने सदैव परराष्ट्रं प्रति माधुर्यपूर्णव्यवहारस्य दृष्टान्तमुपलभ्यते।[२०] यदि कस्यापि कारणवशत: युद्धं जातं तथा सत्यपि युद्धादनन्तरं वश्यतास्वीकारपूर्वकं पराजितोशासक: शासनं परिचालयति स्म। विजितशासकेनापि जनसाधारणान् पुत्रवत् पालयति स्म। इत्यस्य निदर्शनं ब्राह्मणग्रन्थेषु वर्णितम्।[२१] युद्धे वशमुपागते परलोकगते वा सति विजयीराजा विजितदेशस्य य आचार: व्यवहार: तमेवानुकृत्य तस्य देशस्य परिपालनं विधास्यतीति स्मृतिप्रमाणम्।[२२] इत्यत्र अस्माभि: वैदिकवैदेशिकनीतिनामुल्लेखपुरस्सरं सम्प्रति एतस्या: प्रासङ्गिकत्वं प्रदर्शनस्य प्रयास: क्रियते -

क. स्वराज्यस्य संरक्षणार्थं तत्कालीनप्रशासनव्यवस्थायां सीमासुरक्षाया: उपरि विशेषगुरुत्वं प्रदीयते स्म। तत् सुरक्षानिमित्तं सैन्यवलस्य नियोजनं वर्णितम्। यत्र शत्रून् पराभिभवक्षमं जनसमूहं 'सेना' इति पदेनाभिहितम्।[२३] किन्तु भाष्यकार: सायण: "परराष्ट्रे गच्छन् जनसंघ"[२४] इत्यनेन वाक्येन परराष्ट्रे गच्छन्तं जनसमूहं सेना इति पदेनाभिहितम्।

वस्तुत: आयुधहस्ता राष्ट्रस्य सीमासुरक्षानिमित्तं गच्छन्त: जनसमूह एव 'सेना' इति पदवाच्या:। अत: उत्तरवर्तिचिन्तकै: आयुधयुक्तान् सुसज्जितसंघटितजनान् 'सेना' पदेनाभिहितम्।[२५] व्योमभागत: विहितात् वृत्रस्याक्रमणात् देशरक्षार्थं ते सैनिका: सर्वदा सज्जा भवन्ति स्म।[२६] जलभागतोऽपि सम्भाव्य आक्रमणात् स्वराष्ट्ररक्षार्थं सशस्त्रास्त्रेण सुसज्जिता: सैनिका: वैदिकसंहितासु चर्च्चिता:।[२७] सामुद्रतटरक्षणेऽपि सैन्यानां (नौवाहिनीनां) नियोजनस्य वर्णनं वेदे समुपलव्धम्।[२८] इत्यत्र नवतिसंख्यकानां नौकानां वर्णनेन सामुद्रिकसुरक्षाया: व्यवस्था वर्णिता।[२९]

एतादृशी व्यवस्था अद्यापि अस्माकं देशे वरिवर्तते यत्र च 'सीमा सुरक्षा बलमिति' नाम्ना

परिचिता सैन्यव्यवस्था राष्ट्रस्यप्रान्तभागसंरक्षणे निमग्ना: सन्ति। अत: प्रासङ्गिकत्वं तु प्रत्यक्षमेव।

ख. वैदिकलोकतान्त्रिकप्रशासनेऽपि घातकतत्वानामुपस्थिति: दृश्यते। तन्निराकरणार्थं शासकजना: सदैव तत्परा: परिदृश्यन्ते स्म।[३०] तादृशानां देशद्रोहीजनानां कृते उचितदण्डस्य विधानमपि तत्र वर्णितम्।[३१] "यद्ध त्यं मायिनं मृगं तमु त्वं मायया अवधी"[३२] इत्यनेन मन्त्रांशेन मायया छलेन वा शत्रूनाशस्योद्धरणं प्रदर्शितम्। यद्यपि छलेन कस्यापि जनस्य प्राणहरणमनैतिककार्यं किन्तु राष्ट्रस्य समग्रमानवसमाजस्य अनिष्ठसाधकान् तत्वविशेषान् मायया विनष्टुं वेदवाणी विद्यते।

सम्प्रति अस्माकं राष्ट्रस्य कृते घातकस्वरूप-परराष्ट्रशक्ति: विविधदुष्कार्येषु लिप्ता: परिलक्ष्यन्ते। तत्कारणात् "मायया अवधि" इति वैदिकनीतिग्रहणपूर्वकं साम-दाम-दण्ड-भेदनीतिद्वारा तेषामुपरि आघातं कर्तुं शक्यते। महाभारतस्य युद्धेऽपि अधर्मपन्थीनां भीष्म-कर्ण-द्रोणचार्यप्रभृतीनां अनैतिकताया: आचरणेन प्राणहरणस्य दृष्टान्तं समुपलभ्यते। अत: दुष्कृतिकारीणां शत्रूराष्ट्राणां वा विनाशार्थं स्वराष्ट्रसैन्यवलवृद्धिद्वारा आधुनिकशस्त्रास्त्राणां च प्रयोगेण स्वराष्ट्रसंरक्षणमस्माकं कर्तव्यम्। इहपि वैदिकछलनीते: प्रासङ्गिकत्वं परिलक्ष्यते।

ग. वैदिकलोकतान्त्रिकराष्ट्रस्य वैदेशिकनीतिषु एषा मान्यतासीत् यत् परराष्ट्रगमनं केवलं ज्ञानस्य प्रचारनिमित्तं नाधिपत्यविस्तारार्थं न च साम्राज्यस्य विस्तारार्थं वा। अत: कश्चनशोधकर्ता: "आर्यसमस्याया: केवलं निदानम् – नाक्रमणं नैवागमनं अपितु बहिर्गमनमिति स्वीकुर्वन्ति।[३३] ऋग्वैदिकनृपतीनां सुदास-पुरूकुत्स-त्रसदस्यु-मान्धातृप्रभृतिनैकानां जनप्रतिनिधीनां राज्यविस्तारस्य वर्णनं समुपलभ्यते। तेषु मान्धातानृपस्य उल्लेखं सायणेन 'क्षेत्रपतिरूपेण'[३४] ग्रिफिथमहाभागेन 'लड अफ

लेण्डस्’[३५] इत्यनेनोल्लेखितम्। अन्यमेकस्मिन्मन्त्रे सः दस्युनां विनाशकरूपेणोल्लिख्यते।[३६] तस्य मान्धातानृपस्य उत्तरकुरूप्रदेशस्य विजयगाथा सर्वविदिता हि। अनुसन्धातृभिः[३७] वर्तमानविहारप्रदेशे (प्राचीनोत्तरकुरूप्रदेशे) भाजाञ्चले प्राप्तं शिलानिर्मितं रथ-हस्ति-समन्वितं चित्रद्वयं तस्य राज्ञः विजयगाथायाः चित्रणरूपेण स्वीक्रियते।

वेदे ‘कृण्वन्तो विश्वमार्यम्’[३८] इति मन्त्रस्योद्घोषणेन समग्रविश्वमार्यं कर्तुं वैदिकविद्वज्जनानां देशात् बहिर्गमनस्य वर्णनं श्रूयते। वैदिकसाहित्ये यदु-तुर्वशुप्रभृतीनां अनार्यरूपेण कृतं वर्णनं प्राप्यते।[३९] किन्तु “प्र यद् समुद्रम् अति शूर पर्षि पारया तुर्वशं यदुं स्वस्ति”[४०] इतिमन्त्रेनुसारेण समुद्रमार्गेण विदेशगमनस्य शौर्यं यदु-तुर्वश्वादिभिरेव प्राप्तम्। इत्यत्र न केवलं ब्राह्मणाः वैश्यगणाश्च विद्याप्रचारार्थं वाणिज्यार्थमेव परराष्ट्रगमनस्योद्धरणमपितु वैदिकसमाजस्य निम्नजातिविशेषाणां यदुनां बहिर्गमनस्य दृष्टान्तमपि प्राप्तम्।

अनेन विश्लेषणेन एतद् परिलक्ष्यते यत् अन्यराष्ट्रवत् न कदापि पराधिकारहरणार्थं परराष्ट्रं गतमपितु ज्ञानान्वेषणार्थं ज्ञानवितरणार्थञ्च अन्यराष्ट्रे पदार्पणमनेन कृतम्। अतः अद्यापि भारतवर्षः न कमपि राष्ट्रमाक्रमणं करोति। एषा वैदिकनीति अद्यापि विश्ववासिभिरनुकरणीया वर्तते।

### ५. वैदिकलोकतन्त्रस्य राष्ट्रियैक्यमधुना एतस्य प्रासङ्गिकत –

वैदिकलोकतान्त्रिकप्रशासने राष्ट्रियैक्यतायाः परिचयं दातुम् अनेकानां वैदिकतथ्यानामुल्लेखं कर्तुं शक्यते। यथा -

क. देह-राष्ट्र-प्रान्त-क्षेत्र-वंश-वर्णप्रभृतिविषयमधिकृत्य प्राप्तस्य भेद-प्रभेदस्य न कुत्रापि वेदे स्थानं वर्तते। वरञ्च वैदिकजनः सौभाग्यस्य प्राप्तिनिमित्तं श्रेष्ठत्वं कनिष्ठत्वं परिहारपूर्वकमग्रे गन्तुमिच्छन्ति स्म।[४१]

ख. विश्वस्य सर्वैः (मनवाः) परस्परे परस्परं साहाय्यं कर्तव्यम्। मानवाः मानवं साहाय्यं कुर्यात्, एतदेव मानवधर्मस्य मूलमन्त्रः[४२] यच्च वेदे ध्वनितः।

ग. मानवमात्रेण प्राणिमात्रेण वा परस्परं मित्रवत् व्यवहारं कर्तव्यम्। मित्रवदाचरणेन विरोधभावस्य द्वेषभावस्य वा विनाशो भवति। परस्परं कौटिल्यतां परिहारपूर्वकं प्रेमपूर्वकाचरणमेव मित्रतायाः निदर्शनम्। तादृशः द्वेषनाशकः मैत्रिभावः एव सामग्रिकैक्यतायाः कारणमिति श्रुतिषु बृंहितम्[४३]

घ. एकेन अपरस्य मनोभावं ज्ञातव्यम्। परस्परं स्नेहञ्च कर्तव्यम्। एतादृशः दिव्यगुणयुक्ताः सहृदयाः न कदापि विचलितो भवन्ति। एतादृशैःसद्गुणैःसमृद्धाः वैदिकार्याः आसन्निति श्रुतिभिः प्रमाणीयते।[४४]

ङ. समग्रमानवसमाजः सुखशान्तिपूर्णवैभवमयजीवनं यापयेत्। येन समग्र विश्वमेव एकरूपतां गन्तुं शक्नोतीति भावः वेदादिग्रन्थे प्रतिध्वनितः।[४५]

च. प्रत्यक्षस्य एव संरक्षणं स्तवनं वा नासीत् वैदिकर्षिणामादर्शः, अपि तु अप्रत्यक्षस्य कृतेऽपि मंगलमयी कामना परिलक्ष्यते वैदिकस्तुतिषु।[४६]

एवं क्रमेणैव वैदिकप्रशासनव्यवस्थायां राष्ट्रियैक्यं स्थिरीकर्तुं वैदिकर्षयः, ये च तात्कालिकाः सुचिन्तका आसन् तत्पराः दृश्यन्ते। एतेषां चिन्तनप्रसूतां वेदविद्यामधीत्य आधुनिककाले एतस्याः प्रासङ्गिकतायाः विषयमिहोपस्थाप्यते। राष्ट्रियमतैक्ये सति सांगठनिकभ्रातृत्वस्य भावनाः जागृताः भवन्ति। येन पारस्परिकविवादविनाशनपूर्वकं सर्वेः देशवासिनः राष्ट्रहितार्थं सन्नद्धाः भवन्ति।

राष्ट्रियैक्यतायाः प्रयोजनीयता सर्वैरनुभूयते। अधुना सर्वे भाषा-जाति-सम्प्रदायगतविवादेषु लिप्ता सन् सूक्ष्मस्वार्थान् पूरणार्थं सामग्रिकबृहत्-स्वार्थात् वञ्चिताः

परिलक्ष्यन्ते। अत: तत्प्राचीनवैदिकनीतिनां पालनेन जनमानसे ऐक्यभावनामानेतुं शक्यते इति आशा।

न केवलं नीतिप्रणयनेन अपि तु यज्ञाश्रितराजनीतिप्रणयनेन राष्ट्रियैक्यताया: संरक्षणं कर्तुं शक्यते। येन न केवलमेकस्यैव राष्ट्रस्योन्नतिमपितु समग्रविश्वस्य प्रगतिर्भवति। एतादृशानां शोधकार्याणां प्रासङ्गिकत्वमपि इहैव निहितम्।

## ६. वैदिकलोकतन्त्रस्य विविधव्यवस्थादय: तथा तेषां प्रासंगिकता

**क.** वर्तमानसमयस्यस्य राजनैतिकजगति विकशित-संशोधितरूपेण प्राप्ता लोकतन्त्रनामधेया प्रशासनव्यवस्था प्रकृतपक्षे स्वार्थप्रधाना इव प्रतीयते। स्वार्थप्रधानेति पदेन केवलं स्वराष्ट्रस्योन्नतिरेव यया कल्प्यते सा इति बोद्धव्या। अस्यैव लोकतान्त्रिकप्रशासनव्यवस्थाया: प्राचीन रूपस्तु वैदिकसाहित्ये स्वराज्य-जानराज्यादिनाम्ना वर्णीता: आसन्। ता: जानराज्यस्वराज्यादिप्रशासनव्यवस्था विषयप्रधाना: आसन्।[४७] अत: अस्माकमार्षसाहित्येषु राजनीतिशास्त्रं "राजधर्म:" इत्यनेनाभिधीयते। कर्तव्यपालनमेव अस्य राजधर्मेति पदस्य मूलतत्वासीत्। न च स्वार्थसाधनम्। तत्प्राचीनस्य लोकतन्त्रस्य विषयप्रधानानाम् आदर्शानाम् अनुकरणेन वर्तमानस्य लोकतन्त्रमधिकं शुद्धं फलदायकञ्च कर्तुं शक्यते।

**ख.** सम्प्रति लोकतान्त्रिकप्रशासनव्यवस्था एका संघर्षप्रधाना व्यवस्थारूपेण परिगणितास्ति। स्वस्य स्वस्य राजनैतिकमतस्य बहुमतस्थापनमेव वर्तमानलोकतान्त्रिकप्रशासनस्य मुख्यं लक्ष्यं विद्यते। यत्र आदिमावस्थायाम् इयं व्यवस्था उपलब्धिप्रधाना आसीत्।[४८] राजधर्मानुशासनमनुसृत्य प्रजापालनमेव तत् प्राचीनलोकतन्त्रस्य मुख्य: कर्तव्य: आसीत्। उपलब्धिप्रधानव्यवस्थायां कर्तव्यपालनं मुख्यत्वेन परिगण्यते। अत: साम्प्रतिकलोकतन्त्रेऽपि तत् प्राचीनादर्शानामनुकरणेन लोकतन्त्रस्य मेरुपृष्ठं दृढीकर्तुं

शक्यते।

**ग.** प्रजापति: अन्तर्गर्भादुत्पन्नो भवतीति वैदिकसिद्धान्त:।[४९] अर्थात् प्रजानां पति: पालको वा तेषां प्रजाभ्य: एव उत्पन्न: जात: इति भाव:। यथा "धीरा: ब्रह्मविद: तस्य प्रजापते: योनीं स्थानस्वरूपं परिपश्यन्ति अहं ब्रह्मास्मीति जानन्ति"[५०] इत्यनेन वाक्यार्थेन धीरा: विद्वांस: प्रजापते: योनिस्वरूपमिति भाव: स्फुटित:। तथैव वैदिकलोकतान्त्रिकप्रशासने (स्वराज्यशासने) शासिता: जनगणा: तै: निर्वाचितस्य जनप्रतिनिधे: क्षमताधिकारविषये तेषां स्वाभिमतानां प्राधान्यमासीत्। अत: वैदिकर्षिभि: स्वराज्यशासनमेव सर्वोत्कृष्टत्वेन स्वीकृतम्।[५१]

**उपसंहार:**

परिशेषे एतदेवोच्यते यत्वैदिकलोकतान्त्रिकशासनपद्धति उत्कृष्टा-परिमार्जिताश्चासीत्। तात्कालीनशासनपद्धत्यां राजनैतिकदोषाणामवस्थिति: प्राय: नैव संप्राप्यते। निर्वाचनविषयकसमस्या: यथा प्रतिनिधे: योग्यतानिरूपणं, मतदानव्यवस्था,जनसाधारणानां योग्यतानिरूपणं, जनमत-संघटनञ्चेतिविषये वैदिकसिद्धान्त: सुस्पष्ट:। वैदिकलोकतान्त्रिकव्यवस्थायां राजनैतिकगोष्ठिनां, बहुगोष्ठीयपद्धत्यादिनाञ्च अभावात् लोकतान्त्रिकादर्शानां पूर्णत: बहिर्प्रकाशं सम्भवम्। राजधर्मपरायणानां कर्तव्यपरायणानाञ्च शासक-शासितानामवस्थानेन वैदिकलोकतन्त्रस्य एकं नैसर्गिकरूपमस्मान् पुरत: समुपस्थापितमृषिभि: ; यच्च अद्यतनकालेऽपि विशेषफलदायकं स्यात्। अधुना ह्यस्माकं देशे बहुगोष्ठीय-राजनैतिकपद्धति: केवलं स्वार्थसिद्ध्यर्थमेव इति प्रतिभाति। लोकसभा-विधानसभादिषु सांसदा: विधायका: बृहत्तर-राष्ट्रस्वार्थं परित्यजन्त: केवलं स्व-स्वार्थरक्षार्थं सर्वकारीयसिद्धान्तेषु बाधका: भूत्वा कार्यविनाशार्थं तत्परा: दृश्यन्ते। किन्तु एतादृशी दुरवस्था वैदिकलोकतन्त्रे नासीत्। अतो हेतु अद्यतनकाले वैदिकलोकतन्त्रस्यानुकरणं सर्वजनहिताय

बहुजनसुखाय च भवितुमर्हति।

वैदिकवैदेशिकनीतिरपि प्रासङ्गिकत्वं भजते। वैदिकलोकतान्त्रिकिव्यवस्थाया: परराष्ट्रं प्रति माधुर्यपूर्णव्यवहार:, समस्याया: शान्तिपूर्णभावेन समाधानार्थं सूत्रनिर्णय:, सीमासुरक्षाया: व्यवस्थाच आधुनिकलोकतान्त्रिकराष्ट्राणां कृते अनुकरणीया: वर्तन्ते।अधुनालोकतान्त्रिकराष्ट्रयोर्मध्ये प्रवर्तितेषु युद्धविग्रहेषु अस्त्र-शस्त्राणां निर्माणेषु च यावत्-परिमाणस्य धनराशेर्व्ययो भवति तद्व्ययं जनहितार्थं देशहितार्थञ्च विनियोगं कर्तुं शक्यते। यदि वैदिककालिन-लोकतन्त्रीयव्यवस्था ह्यनुक्रियते, यत: तदानीं एतादृशी युद्धविभिषिका नासीदिति प्रतीयते। तदानीं युद्ध-विग्रहो नासीदिति न परन्तु तदासीत् धर्मयुद्ध:। तत्र अद्यतनवत् आणविक-अस्त्र–शस्त्राणां प्रतिस्पर्द्धा नासीत्। युद्धे जनहानिश्च न्युना आसीत्।

शिक्षा व्यवस्थायामपि अधुना यथा बह्वायामी शिक्षा प्रवर्त्तिता, शिक्षादानग्रहणसौलभ्यता परिवर्द्धिता, शिक्षितानां संख्यापि वृद्धिं गता: परन्तु वैदिकशिक्षाया: अभावात् नैतिकीशिक्षा ह्रासं गता येन नैतिकता प्राय: क्षीणा इव प्रतिभाति। भारतवर्षे वैदेशिकशासनात्पूर्वं यथा वैदिकशिक्षया शिक्षितानां संख्या: प्रतिशतरूपेणाधिका: आसन् न तथा प्रतिशतसंख्या अधुना वर्द्धिता यद्यपि शिक्षाया: बह्वायामी व्यवस्था अधुना प्रचलिता। अत: वैदिकव्यवस्थाया: वैदिकलोकतन्त्रिकशासने प्रवर्तिताया: शिक्षा-व्यवस्थाया: अधुनापि प्रासङ्गिकत्वं विराजते।

यद्यपि अद्यतनयुगवत् वैदिकसमाजव्यवस्था प्रगतिशीला नैव प्रतीयते, परन्तु वास्तवक्षेत्रे तस्या: परिणाम धनात्मक आसीत्। शिक्षा-दीक्षा-व्यापार-वाणिज्य-विज्ञान-प्रयुक्तिविद्या-समाजव्यवस्था-परिवेशसचेतनताप्रभृतिविषयेषु वैदिकर्षय: विज्ञा: आसन्। यथा वर्तमानकाले एकांशजना: प्रगते: शिखरि आरूढा: विद्यन्ते, परन्तु अन्यांशानां खाद्यान्नवासस्थानजन्यदु:खेन अश्रुजलनिर्गमनस्य चित्रं दृग्गोचरी भवति तादृशचित्रस्य दर्शनं

वैदिकलोकतान्त्रिकप्रशासने नैव परिलक्षते। न केवलं वैदिकलोकतान्त्रिकप्रशासने ह्यपि तु साम्राज्य-भौज्य-स्वाराज्य-महाराज्य-आधिपत्यप्रभृतिशासनविधेष्वपि अनाहार-दुर्भिक्ष-प्राकृतिकापदानां वर्णनं नैवोपलभ्यते। वैदिकसंहिताग्रन्थे शिक्षाव्यवस्था-पाठ्यक्रमादिविषये कोऽपि समस्याजनक: परिस्थिते: उद्भव: जात इति प्रमाणं नैव दृश्यते। अतएव वैदिकप्रशासनतन्त्रस्यानुकरणं वर्तमानजगति अतीव प्रासंगिकमिव प्रतिभाति।